# shrIgaNeshottarashatakam

# શ્રીગણેશોત્તરશતકમ્

## Document Information

Text title : Ganesha Uttarashatakam 06-32

File name : gaNeshottarashatakam.itx

Category : ganesha, shataka

Location : doc_ganesha

Author : nIlakaNThashAstri

Proofread by : Gopalakrishnan

Description/comments : See accompanying gaNeshapUrvashatakam, From stotrArNavaH 06-32

Latest update : September 10, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 11, 2021

*sanskritdocuments.org*

# શ્રીગણેશોત્તરશતકમ્

એવં સૃષ્ટયવનાદીન્ બ્રહ્માણ્ડાનામનેકકોટીનામ્ ।
કુર્વન્ ક્રીડાવશતો વિનાયકત્વં વિરાજસે મુદિતઃ ॥ ૧॥

ભૌતિકપરમાણૂનાં પુજઞ્જૈર્જાતં યથા નરશરીરમ્ ।
બ્રહ્માણ્ડાત્મવિરાજો વપુર્હિ જાતં તથૈવ બહુગોલૈઃ ॥ ૨॥

ચન્દ્રાદ્યા ઉપગોલાસ્તેષુ હિ વિશ્વમ્ભરાદયો ગોલાઃ ।
સૂર્યાદિમહાગોલાઃ સુમણિદ્વીપાદયઃ પરમગોલાઃ ॥ ૩॥

સર્વાવયવસુપૂર્ણો માતુર્ગર્ભે યથા શિશુર્ભવતિ ।
એવં બહુવિધગોલૈઃ પૂર્ણાવયવં વિરાટ્સ્વરૂપં તત્ ॥ ૪॥

તસ્ય વિરાજો દેહે કટયૂર્ધ્વે ચૈકવિંશતિસ્વર્ગાઃ ।
ષોઢા વિભાગવન્તસ્તેષાં મધ્યે હ્ય ત્વ યં પરમગોલઃ ॥ ૫॥

દ્વીપશ્ચિન્તામણિરિતિ મૂલાધારો વિરાટ્શરીરસ્ય ।
બ્રહ્માણ્ડમધ્યદેશે તિષ્ઠત્વચલઃ સદા નિરાલમ્બઃ ॥ ૬॥

પરમાત્મકલ્પિતેષુ સ્વપથેષુ ગોલા યથા ભ્રમન્ત્યન્યે ।
ન કદાપિ તથા ભ્રામ્યતિ ચિન્તામણિરિત્યયં પરમગોલઃ ॥ ૭॥

તત્તદ્બ્રહ્માણ્ડાત્મકવિરાટ્સમૂહો મહાવિરાડ્બ્રહ્મ ।
તસ્ય હિ સવાવયવા નિખિલૈબ્રહ્માણ્ડકોટિભિઃ પૂર્ણઃ ॥ ૮॥

અખિલાણ્ડકોટિસમુદયજગદાત્માભૂન્મહાવિરાટ્પુરુષઃ ।
બ્રહ્માણ્ડકોટિમધ્યે મૂલપ્રકૃતિસ્વરૂપકો દ્વીપઃ ॥ ૯॥

નામ્ના ચિન્તામણિરિતિ મૂલાધારે મહાવિરાડ્ રૂપે ।
સહસિદ્ધિબુદ્ધિરસ્મિન્ સગુણમહાવાક્યગણપતિર્ભવસિ ॥ ૧૦॥

મૂલાવિદ્યાપ્રતિગતદેવરત્વં હિ પ્લુતપ્રણવરૂપી ।
વિરિશ્ચિહરિહરરવિભિસ્તેષાં શક્ત્યાત્મજાદિભિર્વિનુતઃ ॥ ૧૧॥

એકાર્ણપત્તનાભિધમૂલસ્થાનં વિભાતિ તન્મધ્યે ।
તત્રાપિ કલ્પવૃક્ષોદ્યાનગતોઙ્કારમણ્ટપો ભાતિ ॥ ૧૨॥

સિંહાસને હિ ચિન્તામણિમયસોપાનસંયુતે તસ્મિન્ ।
એકાક્ષરગણપતિમહમનિશં ધ્યાયામિ સિદ્ધિબુદ્ધિયુતમ્ ॥ ૧૩॥

તત્ર મયૂરેશાદિમમૂર્તિવિશેષાન્ સમન્તતોઽભિગતાન્ ।
તચ્છક્તિમૂર્તિસહિતાન્ સહપરિવારાન્ સમાશ્રયે સતતમ્ ॥ ૧૪॥

તત્ર પ્રથમાવરણે યુવરાઽવ્યક્તગણપતિં વન્દે ।
ગણકં હંસગણપતિં ભજેઽહમન્યાંસ્તદીયપરિવારાન્ ॥ ૧૫॥

અદ્ભુતરચનાવત્યસ્તત્ર ચતુષ્ષષ્ટિવિધયઃ સન્તિ ।
તત્તત્સ્વથલાધિકારાનુરૂપગણપાશ્ચ કોટિશઃ સન્તિ ॥ ૧૬॥

નાત્રત્યવૈભવાદીન્ શેષોઽપીષ્ટે યથાવદાખ્યાતુમ્ ।
અત્યલ્પબુદ્ધિવિભવઃ પ્રભુર્ભવેયં કથં નુ વર્ણયિતુમ્ ॥ ૧૭॥

એકાપત્તનસ્ય તુ દક્ષિણપાર્શ્વે પુરં વરં ભવતિ ।
નામ્ના ષડર્ણપત્તનમાજ્ઞાસ્થાનં સ્થલં હિ કૃત્યાનાં કાર્યાણામ્ ॥ ૧૮॥

અત્ર હિ ષડર્ણરૂપી નિજશક્તિભ્યાં ચકાસ્તિ વિઘ્નેશઃ ।
તં ત્વાં નમામિ સન્તતં પ્રાયઃ પ્રાગુદિતવૈભવાદિયુતમ્ ॥ ૧૯॥

નિચિતચતુર્દશભુવનં સપ્તમહાદ્વીપવસુમતીમધ્યમ ।
લોકાલોકવલયિતં બ્રહ્માણ્ડમિદં તથાન્યદપિ સર્વમ્ ॥ ૨૦॥

ગગને ખદ્યોત ઇવ હ્યણ્ડઃ પ્રદ્યોતતેઽયમેકૈકઃ ।
અણ્વણુમાત્રાવયવઃ પરિણતજગદાકૃતેઃ કિલ મહાપ્રકૃતે ॥ ૨૧॥

નિખિલબ્રહ્માણ્ડોપરિભાગે સ્વાનન્દભવનલોકરતે ।
અન્વર્થનામધેયો મુદ્ગલકપિલાદિયોગિભજનીયઃ ॥ ૨૨॥

સ દ્વાદશાન્તદેશો મહાવિરાજોઽખિલાણ્ડરૂપસ્ય ।
ઐક્ષવસાગરમધ્યે પ્રદીપ્યતે કોટિયોજનં વિતતઃ ॥ ૨૩॥

કોટિદિવાકરદીપ્તિર્યત્ર ચ પુરુષાર્થસમ્પરિસમાપ્તિઃ ।
યત્ર ન પુનરાવૃત્તિર્યશ્ચ મહાવાક્યગણપતેર્વસતિઃ ॥ ૨૪॥

તત્ર હિ મૂલસ્થાનં શતયોજનવિસ્તૃતાયતોત્તુઙ્ગમ્ ।
ઓઙ્કારવલયરૂપામૃતસાગરમધ્યગં વિભાતિ તવ ॥ ૨૫॥

તત્ર સહસ્રસ્તમ્ભે ચિન્તામણિમણ્ટપે વિચિત્રતમે ।
એકાક્ષરપીઠે તવ તેજોમયવિગ્રહં હૃદા કલયે ॥ ૨૬॥

ભવદીયસત્યભાગે સ્મિતવદનાં બ્રહ્મભાવદાં દયિતામ્ ।
ધ્યાયામિ સિદ્ધિદેવીં પીતામ્બરધારિણીં ચ જગદમ્બામ્ ॥ ૨૭॥

કલ્હારકુસુમમાલાં કસ્તૂરીતિલકવિજ્વલત્ફાલામ્ ।
કરુણાપૂર્ણકટાક્ષાં કનકસવર્ણાં સદૃક્ષાં ગ્ચ મોક્ષલક્ષ્મીં તામ્ ॥ ૨૮॥

શશિશેખરાં ત્રિનયનાં સુવર્ણસરસીરુહે સુખાસીનામ્ ।
ભાસુરસર્વવિભૂષણવૃન્દાં સર્વાઙ્ગસુન્દરીં વન્દે ॥ ૨૯॥

ધ્યાયામિ બુદ્ધિદેવીં બ્રહ્મજ્ઞાનપ્રદયિનીં દયિતામ્ ।
ભવદીયદક્ષભાગે ઘનસારતુષારસન્નિભશરીરામ્ ॥ ૩૦॥

મન્દસ્મિતમુખપદ્માં મન્દારમુખપ્રસૂનકૃતમાલામ્ ।
વન્દારુમધુજ ભજન લોલાં વૃન્દારકમુખ્યમૃગ્યપદમૂલામ્ ॥ ૩૧॥

કસ્તૂરિકાવિશેષકવિલસિતનિટિલાં ગણેશકૃતલીલામ્ ।
સિતતામરસાસીનાં ત્રિલોચનાં ચન્દ્રશેખરાં રુચિરામ્ ॥ ૩૨॥

ભવતો ભવનં પરિતઃ પ્રથમાવરણે વિચિત્રરત્નાનિ ।
ક્રીડાગાનાદીનિ સ્થાનાનિ મનોહરાણિ સુબહૂનિ ॥ ૩૩॥

તત્તત્સ્થાનાનુગુણં ગૃહીતકમનીયવિગ્રહવિશેષઃ ।
સિદ્ધ્યા બુદ્ધ્યા ચ યુતો વિહરસિ મુદિતસ્તદર્હપરિવારઃ ॥ ૩૪॥

કન્દર્પકોટિપરિભૂસૌન્દર્યઝરીતરઙ્ગિતાકારાઃ ।
ક્રીડાગાનાદિગતા મઙ્ગલમૂર્તીશ્ચ મન્મહે મનસિ ॥ ૩૫॥

ભવતઃ કટાક્ષવીક્ષાં પ્રતીક્ષમાણાશ્ચ કિઙ્કરપ્રવરાઃ ।
આજ્ઞાકરણપ્રવણા અભ્યર્ણે સન્તિ કોટિકોટિગણાઃ ॥ ૩૬॥

ભવતો હિ વામપૂર્વે કિઞ્ચિન્ન્યૂને મહેન્દ્રમણિપીઠે ।
આસીનં યુવરાજ સિદ્ધિસુતાઽવ્યક્તગણપતિં વન્દે ॥ ૩૭॥

દૂર્વાદલવચ્છ્યામલકોમલમૂર્તિં નિશાકરાપીડમ્ ।
કન્દર્પસુન્દરાઙ્ગં કૌસ્તુભચિન્તામણિપ્રભાદીપ્રમ્ ॥ ૩૮॥

નિજલોકવાસિસર્વાભીપ્સિતવિજ્ઞાપનાદિવાનામ્ ।

વિજ્ઞાપયતિ વિશેષાન્ સ કિલ મહાવાક્યગણપતેઃ સવિધેભવતે ॥ ૩૯॥

ભવદીયસન્નિધાને તસ્માદન્યો ન કોઽપિ ગણવર્ગઃ ।
ગન્તું સ્થાતું વાપિ પ્રભવતિ કિમુત પ્રભાષણાદિવિધૌ ॥ ૪૦॥

અપિ ચાવ્યક્તનિવેદિતનિજભક્તજનાનુકૂલકૃત્યાનિ ।
આકર્ણનમાત્રાદપિ સદ્યઃ કર્તું કૃતાદરો હિ ભવાન્ ॥ ૪૧॥

ભવતો હિ યામ્યપૂર્વે સ્ફાટિકપીઠે ગુરું સુખાસીનમ્ ।
અતિસુન્દરં યુવાનં બુદ્ધેઃ સૂનું વિ સુ લેખનીપાણિમ્ ॥ ૪૨॥

ચૂડાશશિપ્રકાશં શુદ્ધસ્ફટિકપ્રભાપ્રતીકાશમ્ ।
ગણકં ગણકાધીશં હંસગણેશં નમામ્યમાત્યે નમામિ સચિવે શમ્ ॥ ૪૩॥

લોકં દેશં ગ્રામ બ્રહ્માણ્ડસ્થિતપરાત્મભક્તાનામ્ ।
પૂર્વાચરિતાન્ ગણકો ધર્માદીંશ્ચ સ્વપુસ્તકે લિખતિ ॥ ૪૪॥

ગણકવિલેખનમાત્રાત્ સકલાન્નિજભક્તપુઙ્ગવાકલિતાન્ ।
પ્રણિદાપયસ્યનલ્પાન્ કામકલાપાન્ સુરાદિદુરવાપાન્ ॥ ૪૫॥

બ્રહ્મ મહત્તત્ત્વગતં ગણકં પ્રાહુઃ સમસ્તયોગીન્દ્રાઃ ।
યો નિબબન્ધ ગ્રન્થાન્ ગણપતિવિષયાન્ મહેતિહાસાદીન્ ॥ ૪૬॥

ધ્યાયન્તિ હંસરૂપં પરમગુરું યં સહસ્રદલપદ્મે ।
આસીનં ગણકેશં હૃદયે કિલ યોગિપુઙ્ગવાઃ સતતમ્ ॥ ૪૭॥

નિખિલબ્રહ્માણ્ડસ્થિતભક્ત જનાનાં હિતાહિતં વક્તુમ્ ।
વરદાદિકોટિગણપા વિકટસ્યાન્તે વહન્તિ સચિવત્વમ્ ॥ ૪૮॥

અખિલાણ્ડકોટિનિવસદ્ભક્તાનાનન્દભવનમાનેતુમ્ ।
આધિકારપદનિયુક્તા આમોદમુખા ભવન્તિ કોદિગણાઃ ॥ ૪૯॥

ત્વદ્ભક્તિમાત્રસુલભાનીદૃશતત્રત્યસર્વપરિવારાન્ ।
મનસા નુમો નૌન્ય નવરતં દ્વારીભૂતાન્ ભવત્સમીપાપ્તૌ ॥ ૫૦॥

ત્રિનયનચન્દ્રાપીડા બ્રહ્માનન્દામ્બુધૌ ભૃશં મગ્નાઃ ।
આનન્દભવનભુવને ગણપતિસારૂપ્યભાગિનોઽનન્તાઃ ॥ ૫૧॥

બહુકલ્પકોટિકાલં ભવતઃ સદુપાસનાત્ પ્રમોદન્તે ।
શુણ્ડાદણ્ડવિરાજત્તુણ્ડાવિગલન્મદામ્બુયુતગણ્ડાઃ ॥ ૫૨॥

સાલોક્યમુક્તિભાજોઽસઙ્ખ્યેયાશ્ચાખિલાણ્ડભક્તજનાઃ ।
એવં સામીપ્યપદપ્રાપ્ત્યા સુખભૂમભાગિનોઽનન્તાઃ ॥ ૫૩॥

સ્વર્ગાદિવાસિનામપિ દુષ્ટાસુરબાધશાપબાધાદિઃ ।
પ્રારબ્ધકર્મભોગઃ કદાચિદપિ માતૃગર્ભવાસાદિઃ ॥ ૫૪॥

આનન્દભવનવાસી નૈતાદૃગુપદ્રવં કદાચિદપિ ।
અનુભવતિ કિં ત્વખણ્ડં બ્રહ્માનન્દં ન દુઃખસમ્ભિન્નમ્ ॥ ૫૫॥

સઙ્કલ્પમાત્રસુલભાનાહારવિહારકામભોગાદીન્ ।
પરિહૃત્ય નિત્યતૃપ્તા નિત્યાનન્દાત્મના મહાત્માનઃ ॥ ૫૬॥

જ્ઞાનયોગાદિનિષ્ઠા જીવન્મુક્તા ગતા હિ યે તત્ર ।
બ્રહ્મવિચારપરાસ્તે પ્રાપુરનન્તા વિદેહકૈવલ્યમ્ ॥ ૫૭॥

કેશાધિકારયુક્તા યોગિજના યે તુ પૂર્વકલ્પેષુ ।
બ્રહ્માચ્યુતાદયસ્તે વિદ્યન્તે તત્ર કોટિશઃ પરિતઃ ॥ ૫૮॥

અવતારમૂર્તયસ્તે સન્તિ સમન્તાત્ સહસ્રશસ્તત્ર ।
તવ તત્ર તત્રૈવ મૂર્તિમન્તો હ્યામ્નાયાન્તાઃ સ્તુવન્તિ મહિમાનં તવ રૂપમ્ ॥ ૫૯॥

સર્વાવરણસમેતાસ્તત્તત્વચ્છક્તિસિદ્ધિબુદ્ધ્યંશાઃ ।
તત્તદવસરા કાલ નુગુણાઃ સન્તિ સહસ્રં હિ મૂર્તયસ્તત્ર ॥ ૬૦॥

ઇત્યાનવમાવરણં વિચિત્રરૂપા વિભૂતિવિભવાદ્યાઃ ।
કવિવાઙ્મનસોઽવિષયાઃ સન્તિ સ્વાનન્દભવનલોકે તે ॥ ૬૧॥

એતેભ્યશ્ચ નિજેભ્યો લોકાનુગ્રાહિમૂર્તિભેદેભ્યઃ ।
જીવન્મુક્તાદિભ્યોઽત્રત્યમહદ્ભયો નમોઽસ્તુ સર્વેભ્યઃ ॥ ૬૨॥

દૂરે ભવતઃ પુરતો સિંહાસનસ્ય મૂલે મૂષકરાજો વિરાજતે સુતરામ્ ।
દસ્યુરિવાન્તર્યામી ભુઙ્ક્તે ભોગાંશ્ચ સર્વજન્તૂનામ્ ॥ ૬૩॥

અવ્યક્તગણપતિસ્તવ સેવાર્થં પ્રાપ મૂષકાકારમ્ ।
ભવદીયવાહનેષ્વપિ કુરુતે સર્વેષ્વનુપ્રવેશમયમ્ ॥ ૬૪॥

યદ્યપિ હંસો વિલિખતિ ચણ્ડો વા નનભૈરવો દાતાઃ ।
ભવદાલયે ગણપતે સતતં સેવાફલં હિ ભક્તેભ્યઃ ॥ ૬૫॥

પૂર્વં તવ સેવાર્થં પ્રવેશકાલેઽસ્ય મૂષકસ્ય તથા સ્યાન્તે ।
ન લભેત ચેદનુજ્ઞાં સેવા ફલમપિ સુદુર્લભં તસ્ય ॥ ૬૬॥

સેવાનભિજ્ઞમપિ મામનીશમન્યાદૃશોપચારવિધૌ ।
ચણ્ડાદયોઽનુગૃહ્ણન્ત્વેતે ભવદીયભવનપરિવારાઃ ॥ ૬૭॥

તવ ભક્તકોટિમહિમા વક્તુમશક્યોઽત્ર મુદ્ગલઃ પ્રવરઃ ।
યચ્છિષ્યાઃ કપિલાદ્યાઃ સન્તિ ચતુષ્ષષ્ટિકોટિમિત્રસિદ્ધાઃ ॥ ૬૮॥

ત્વન્નામમાત્રજાપા સમૂલકાષં કષન્તિ કલુષાણિ ।
વિષહરણસિદ્ધમન્ત્રો જપમાત્રાદિવ વિષં નિરવ શેષમ્ ॥ ૬૯॥

કુઙ્કુમકર્પૂરાગરુમૃગમદગોરોચનદયિતગન્ધમ ।
યદ્ભક્તા દધતે તદ્વસ્તુ ગજાસ્યં સદાસ્તુ મમ ચિત્તે ॥ ૭૦॥

શ્વેતાર્કમૂલમૂર્તિ જીવદ્ગજદન્તમૂર્તિમપિ ભવતઃ ।
શોણશિલામપિ મનસા પ્રવાલરત્નાદિમૂર્તિમપિ મહયે ॥ ૭૧॥

દૂર્વાર્ચનમન્ત્રજપા વ્રતં ચતુર્થ્યાં યદીયચિહ્નાનિ ।
સિન્દૂરધારણાદ્યપિ સ ગણાધ્યક્ષઃ સદાસ્તુ મમ શરણમ્ ॥ ૭૨॥

દૂર્વારહિતસપર્યા વિફલા ભવતઃ કૃતાપિ હેરમ્બ ।
નિજશક્તિદત્તબીજદ્વયરૂઢા યત્ શતાઙ્કુરા દેવી ॥ ૭૩॥

દુઃસ્વપ્નનાશિની સા સ્વાર્ચકપાપાપનોદનૈકચતુરા પરા ।
ભક્તજનવિઘ્નહન્ત્રી દૂર્વાયાં તે તતો મહાપ્રીતિઃ ॥ ૭૪॥

યદ્યપિ દૂર્વાન્નમયી દુર્ગાશપ્તા તૃણાત્મના જાતા ।
આરાધ્ય સિદ્ધિબુદ્ધી શ્વેતહરિદ્ભેદતો દ્વિધાભૂત્ સા ॥ ૭૫॥

દુર્ગાર્ચને તુ નિન્દ્યા શ્લાઘ્યતમમેવાર્ચનેઽન્યદેવાનામ્ ।
ભવતોઽતિશ્લાઘ્યતમા યુગ્મત એકૈકવિંશતિભ્યાં વા ॥ ૭૬॥

તુલસી નીલા દેવી વૈષ્ણવમાયા ગણેશશપ્તા સા ।
ભવતોઽત એવ નિન્દ્યા અર્હા ગ્રહદેવતાન્યદેવાનામ્ ॥ ૭૭॥

શ્વેતાર્કકુસુમનિકરૈર્મન્દારસુમૈસ્તથા શમીપત્રૈઃ ।
ભક્તૈરર્ચિતમાત્રાદ્યથાતિતૃપ્તિસ્તથા ન તે ક્વાપિ ॥ ૭૮॥

શ્વેતાર્કમૂલમણિભિર્મન્દારશમીમયૈશ્ચ મણિનિચયૈઃ ।
પ્રથિતાં કિલાક્ષમાલાં ધારયિતારઃ પ્રસાદપાત્રં તે ॥ ૭૯॥

વિજયપ્રવાલનગરો ભૌમમયૂરેશનાસિકાદીનામ્ ।

ક્ષેત્રાણાં યાત્રાયામશક્તમપિ માં પુનાતુ વિઘ્નેશઃ ॥ ૮૦॥

ન મમ જ્ઞાને નિષ્ઠા યોગે વા મન્ત્રકર્મનામાદૌ ।
ત્વત્પાદાશ્રયણાન્મામુદ્ધર સંસારતશ્ચ સિદ્ધિપતે ॥ ૮૧॥

નિર્વાણદીક્ષયાહં ન સંસ્કૃતો નાપિ યોગદીક્ષાદ્યૈઃ ।
સામાન્યદીક્ષયાપિ ચ પુનીહિ બુદ્ધીશ ભાવનાલેશાત્ ॥ ૮૨॥

મામકૃતસુકૃતસઞ્ચયમનુપાસિતમુખ્યદેવતામૂર્તિમ્ ।
કેવલભક્તિબલાન્માં કૃતાર્થયેથાઃ સ્ત્વં કૃપાપયોરાશે ॥ ૮૩॥

ઇચ્છામાત્રાદણુમપિ મેરું કુરુષેઽનલં ચ સલિલમિવ ।
મરુમપિ જલધિં ભવતો મદઘનિરાસે ગણેશ કો ભારઃ ॥ ૮૪॥

આકસ્મિકયસિ કામાન દુરવાપાનપિ વિચિત્રયસ્યર્થાન્ ।
સર્વમકિઞ્ચિત્કરમપ્યપેક્ષસે કિન્ત્વનુગ્રહાર્હં મામ્ ॥ ૮૫॥

યો દેશકાલવસ્તુભિરપરિચ્છિન્નોઽપિ હૃદ્ગુહાવર્તી ।
પ્રેરયતિ સર્વજન્તૂનનવરતં તં ગણેશમર્હામિ ॥ ૮૬॥

કાલસ્વભાવનિયતિપ્રભૃતિમમન્યન્ત યે જગદ્બીજં (યે જગદ્બીજમુદ્ ગિરન્તિ) ।
અવિદન્તસ્તવ તત્ત્વં સંસૃતિચક્રે ભ્રમન્તિ મુહ્યન્તઃ ॥ ૮૭॥

સંસૃતિધર્માસઙ્ગી તત્સાક્ષી ત્વં તદાનુરૂપ્યેણ ।
ઉચ્ચાવચફલદાતુસ્તવ ચ ન વૈષમ્યં નાપિ નૈર્ઘૃણ્યમ્ ॥ ૮૮॥

યમુપાસેઽસ્મિઞ્જન્મનિ દેવં યાવચ્છરીરહાનમહમ્ ।
પ્રેત્ય પ્રતિપત્સ્યેઽહં તમેવ ભાવં ચ તત્ક્રતુન્યાયાત્ ॥ ૮૯॥

પ્રાગુત્પત્તેસ્ત્વમિદં જગચ્ચ સર્વં સ્થિતેરવસ્થાયામ ।
પ્રલયાવસ્થાયાં ત્વં ધ્યાયેયં કં કથં ત્વદન્યમહમ્ ॥ ૧૦॥

કામતરઙ્ગાભિહતં ગભીરસંસારસાગરે મગ્નમ્ ।
વિષયગ્રહગૃહીતં ભવાબ્ધિપોતસ્ત્વમેવ તારય મામ્ ॥ ૯૧॥

બહુ સુખ દુઃખમોહરૂપપ્રપઞ્ચજાલાઙ્કુરપ્રરોહાર્હમ્ ।
મૂલાવિદ્યાબીજં દગ્ધું નાન્યદ્વિના ભવજ્જ્ઞાનમ્ ॥ ૯૨॥

માયાવિલાસિતમેતત્ પ્રપઞ્ચજાલં ન વસ્તુતઃ કિઞ્જિત્ ।
ન હિ રજ્જુશુક્તિકાદિવ્યતિરેકેણાસ્તિ સર્પરજતાદિઃ ॥ ૯૩॥

તજ્જ્ઞાનં મે સુલભં યજ્ઞતપોદાનસાધનાભાવાત્ ।
ત્વદ્ભક્તિમાત્રસાધનમતિદીનં મામનુગૃહાણ વિભો ॥ ૯૪॥

ગન્ધર્વનગરકલ્પં સર્વં સ્વાપ્નપ્રવૃત્તિસદૃશઞ્ચ ।
માયામાત્રં મન્યે ત્વદ્વ્યતિરિક્તં ત્વદેકતાનોઽહમ્ ॥ ૯૫॥

અગ્રાહ્યોઽનિર્દેશ્યોઽચિન્ત્યોઽતર્ક્યોઽપ્રમેયમહિમા ત્વં
વિક્ષિપ્તચિત્તવૃત્તિઃ પ્રભવેયમહં કથં મમ દ્ધ્યાને ॥ ૯૬॥

ભૂતભવદ્ભવ્યેષુ ત્વદ્વ્યતિરિક્તઃ કદાપિ નાસેઽહં   નાસીય
ત્વદ્ભાવાપત્તિસ્નુ ભ્રમાપગમનાત્ સદા ત્વદાત્માહમ્ ॥ ૯૭॥

શઙ્ગાગ્રાહિકયેદૃશ આત્મેત્યુક્તૌ શ્રુતિસ્ત્વનીશાના ।
ચકિતા પ્રતિપાદયતિ હ્યધ્યારોપાપવાદરીત્યા ત્વામ્ ॥ ૯૮॥

ત્વામેવાહં જાને ત્વદન્યભાવભ્રમાપગમનાય ।
ત્વદ્ભાવભાવિતોઽહં ન્યં ન ભોગ્યવર્ગઞ્ચ કામયે કમપિ ॥ ૯૯॥

લમ્બોદર હેરમ્બ દ્વૈમાતુર દન્તિવદન વિનેશ ।
અવ્યાજદયાસિન્ધો ભક્તપરાધીન દીનજનબન્ધો ॥ ૧૦૦॥

ભવતાનુગ્રાહ્યોઽહં સંસૃતિબન્ધાદહં પ્રમુચ્યેય ।
નાલ્પેન લોભનીયઃ વિષયાનન્દં ન ચાભિનન્દેયમ્ ॥ ૧૦૧॥

ન સ્વર્ગસ્વાનન્દં કાર્યસ્વાનન્દમપ્યહં નેહે ।
આનન્દભવનમીયાં તદ્વિન્દેયં વિદેહકૈવલ્યમ્ ॥ ૧૦૨॥

યદ્યપિ શુદ્ધાદ્વૈતી બાહ્યસુપૂજનાદિનાપિ શૈવોઽહમ્ ।
પરમાત્મભાવિતગણપતિભાવઃ કદાપિ માપૈતુ ॥ ૧૦૩॥

શ્રુત્યાદિષુ પ્રસિદ્ધા ગુણગણ ગણપતિ વિભવા યથાવદાખ્યાતાઃ ।
કવિસમયસહજસિદ્ધા વાચોયુક્તિઃ પ્રતાયતે ન મયા ॥ ૧૦૪॥

યદ્યપિ ગણપતિગુણગણવર્ણનમેવ પ્રધાનતઃ પ્રકૃતમ્ ।
મતવિમતનાન્તરીયકનિરૂપણશ્ચાનુષઙ્ગતો ગ્રથિતમ્ ॥ ૧૦૫॥

અત એવ પૂર્વમેવ પ્રતિશ્રુતશ્લોકશતકતોઽપ્યધિકા ।
વિનેશભિન્નવિષયપ્રતિપાદનતત્પરાઃ કૃતાઃ શ્લોકાઃ ॥ ૧૦૬॥

ઇતિ નીલકણ્ઠશાસ્ત્રી વિદ્વદ્રત્નોપનામવાન્ વિબુધઃ ।
શઙ્કરભગવત્પદસ્થાપિતષટ્દર્શની સુસારજ્ઞઃ ॥ ૧૦૭॥

ગામિષુ ભવત્સુ સપ્તદશાધિકપઞ્ચસહસ્રેષુ કલિ યુગાબ્દેષુ ।
અકરોદ્ગણેશશતકં તદ્ગુણલેશૈઃ સ્વવાગ્વિશુધ્યર્થમ્ ॥ ૧૦૮॥

તં ક્ષામ્યન્તુ મહાન્તો યદિ પ્રમાદપ્રયુક્તદોષઃ સ્યાત્ ।
જીયાદિયં કૃતિર્મે સુચિરં ભૂયાન્મુદે ચ સિદ્ધિપતેઃ ॥ ૧૦૯॥

સંસારદશાયામપિ મોક્ષદશાયાં તથૈકરૂપત્વમ્ ।
આત્મન ઉક્તોઽત એવ શાન્ત બ્રહ્મપ્રવાદિભિઃ સાઙ્ખ્યૈઃ ॥ ૧૧૦॥

મીમાંસકાસ્તુ કથયન્ત્યાત્માહમ્પ્રત્યયેન વેદ્ય ઇતિ ।
અન્યે ત્વન્યં સર્વં ન વસ્તુતઃ કિન્ત્વપક્કસોપાનમ્ ॥ ૧૧૧॥

વિગતદ્વૈતાભાસો વેદ્યાન્તરવિષયવૃત્તિહીનોઽહમ્ ।
ત્વદ્રૂપચિત્તવૃત્તિઃ કિન્ન ભવેયં સદા ત્વદાકારઃ ॥ ૧૧૨॥

નિરતિશયાન્દાત્મભવત્સ્વરૂપે મહાપયોરાશૌ ।
વિષયાનન્દો નાર્હતિ બિન્દશતતમાંશમાત્રમપિ ભવિતુમ ॥ ૧૧૩॥

॥ ઇતિ શ્રીવિદ્વદ્રત્નોપનામકેન વૈયાકરણશિરોમણિના વૈદિકષડ્દર્શનીસારવેદિના
નીલકણ્ઠશાસ્ત્રિણા વિરચિતં ગણેશોત્તરશતકં સમાપ્તમ્ ।

Proofread by Gopalakrisnan

*shrIgaNeshottarashatakam*

pdf was typeset on September 11, 2021

Please send corrections to *sanskrit@cheerful.com*